International Journal of Sanskrit Research 2021; 7(1): 260-262

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 260-262
© 2021 IJSR
www.anantaajournal.com
Received: 18-11-2020
Accepted: 25-12-2020

**Kajal Oraon**
Ph.D Scholar, School of Sanskrit and Indic Studies, Jawaharlal Nehru University, New Delhi, India

**Corresponding Author:**
**Kajal Oraon**
Ph.D Scholar, School of Sanskrit and Indic Studies, Jawaharlal Nehru University, New Delhi, India

# दशकुमारचरिते राजनीतिविवेचनम्

**Kajal Oraon**

**सारांश**
वर्तमानकाले नागरिकस्तरे अथवा व्यक्तिगतस्तरे विशेषसिद्धान्तेषु केचित् परिचर्चा: कुर्वन्ति, सा राजनीति इति कथ्यते। राजनीत्याम् स्वज्ञाने भिन्न: नीत्या: आगच्छन्ति यथा- नीत्या: निर्माणं करोति, राजनीतिविचाराणां अग्रेसरति, शत्रुणां प्रति युद्ध: कथं करणीयम् इति विषयणां चिन्तनं करोति। राजनीति अनेकेन प्रकारेण भवितुं शक्नोति यथा- ग्रामस्य परम्परागत: राजनीति, स्थानीयसर्वकार:, सम्प्रभुत्वपूर्णराज्य: अथवा अन्तराष्ट्रीयस्तरे भवति।
प्राचीनसंस्कृतसाहित्येषु राजनीतिविषयक तथ्याणां प्रभुत्वमस्ति । सम्प्रति तत्कालीनराजनीतिकस्थिकां अवलोक्यते । कौटिल्येन विरचित: अर्थशास्त्र: राजनीतिविषयकमुख्यग्रन्थ: अस्ति य: वर्तमानकाले अत्यन्तोपयोगी भवति। एतस्मिन क्रमे प्राय: षष्ठीशताब्द्या: संस्कृतग्रन्थ: दण्डीविरचित: दशकुमारचरितोऽस्ति। यस्मिन् अष्ट: उच्छवासा: सन्ति। एतस्मिन् काव्ये दशकुमाराणां चरित्राणां वर्णनं अस्ति। एतस्मात् कारणात् एतस्य नाम: दशकुमारचरितोऽस्ति।
दशकुमारचरितसंस्कृतगद्यकाव्यस्य अष्टमोच्छवासे आधुनिकराजनीत्या: सन्दर्भे महत्वपूर्णं परिचर्चा: सन्ति।

**कूटशब्द:** दशकुमारचरितम्, राजनीति, मन्त्रगुप्त:, जयसिंह:, किङ्कर: राक्षस:, सप्तांगराज्य:, षाडगुण: ।

## प्रस्तावना

### सप्तमोच्छवासे राजनीति-

संस्कृतसाहित्ये महाकविदण्ड्या: विशिष्टं स्थानं वर्तते । दशकुमारचरितम् काव्यं तस्य लोकप्रिय: अथवा प्रसिद्ध: रचना अस्ति, य: एक: संस्कृतगद्यकाव्योऽस्ति:। एतस्मिन् दशकुमाराणां माध्यमेन तत्कालसमाजस्य सर्वेषां वर्गाणां राज्यप्रसादानां च नीत्व जनमानसजीवने रोचकतापूर्णं वर्णनं परिलक्षयते। दशकुमारचरिते यथार्थवाद: स्व अभिव्यक्तयां अनेक: अवलोक्यते। दशकुमारचरितस्य सप्तमोच्छवासे मन्त्रगुप्तस्य चरित्रं सम्यकरुपेण विवेचनं वर्तते, यस्मिन् राजनीतिकविषय: दृश्यते। मन्त्रगुप्त: पाखण्डीसिद्धस्य हननं कृत्वा राजकन्या कनकलेखां उद्धारं कृतवान्, अत्र आपद्-धर्म स्पष्टं भवति। य:

सामान्यत: अधर्मस्य रुपे भवति परञ्च विपत्तिकाले धर्मस्य रुपं नीयते तदैव आपद्धर्म: वर्तते। महाभारते उक्तञ्च- धर्मस्य त्याग: कदापि न करणीय:।[1] मन्त्रगुप्त: किङ्कर: राक्षसम् उक्त: यत् स्वल्पकार्यं ये जना: सम्यकरुपेण कुर्वन्ति। तस्य कार्यं महानतमं भवति एवं सर्वे जना: तं सज्जना: मान्यन्ते।[2] राजनीत्यां सज्जनपुरुषाणाम् आवश्यकता वर्तते। छद्मवेशे साधु सिद्धपुरुष: धारणं कृत्वा तस्य राज्ये गत्वा मन्त्रगुप्त: प्रियां कनखलेखां नृपजयसिंहात् वहि: आनीतवान्। तस्य वाक्पुटता जलाशयं च अश्रित्वा नृपस्य हननं कृतवान्। अत्र अचार्यस्य कौटिल्यस्य गुप्तचरव्यवस्था दृश्यते । अत्र वुद्धिमान्, सदाचारी साधु च वेषभूषणं धारणं कृत्वा नृपजयसिंहस्य समीपे गच्छति। य: उदास्थित: गुप्तचर: कथ्यते।[3]

### अष्टमोच्छवासे राजनीति-

दशकुमारचरितस्य एतस्मिन् उच्छवासे राजपुत्रविश्रुतस्य साहसिककार्याणां वर्णनं अस्ति। यस्मिन् राजनीतिकरणस्य प्रतिविम्बं मिलति। दशकुमारचरितम् एकं राजनीतिकगद्यकाव्यं अस्ति। यस्मिन् दशाकुमाराणां कथायां राजनीतिसम्बन्धस्य वर्णन: प्राप्यते। दण्डी स्वयं कतिचनानां आचार्याणां नाम: नयति। एतस्मिन् सर्वे अधिकप्रभाव: कौटिल्य-अर्थशास्त्र: अस्ति। एतस्मिन् गद्यकाव्ये राजनीतिं नतूनरुपेण प्रस्तुतं कृतवान्। अत्र U.N. Ghosal **उक्तश्च-** "The ultimate source of our author's political ideas, they are scattered or systematic, is beyond doubt the antecedent *Arthashastra*, smriti tradition but they often develop a striking freshness and originality of outlook".[4]

दशकुमारचरिते कौटिलस्य नाम: दण्डी नयति। यथा- चिन्तज्ञानानुवर्तिनोऽनर्थ्या अपि प्रिया: स्यु:। दक्षिणा अपि तद्भाववहिष्कृता द्वेष्या भवेयु: इति।[5] इथ्यम् अग्रे अर्थशास्त्रे उक्त: अनर्थकारी जना: अपि नृपस्य प्रिय: भवन्ति। नृपस्य समीपे हसनीयं काष्ठस्य समान: न भवित्वा हसनीयं घोरहांसांश्च नियन्त्रणं करणीयम्।[6] इथ्यं वृद्धनृप: पुण्यवर्माया: गुनाणां वर्णन: विश्रुतस्य श्रोणति यत् विदर्भदेशे भोजवंश: भूषण:, महाबली, सत्यवती, तन-मनत: प्रजाया: उन्नत्यायां तत्पर: भवति। धर्मार्थसंग्रहे सदैव प्रयत्नशील:, अधिकारिणां गुप्तरुपेण परीक्षा नीयति। जनानां विपत्तिनां प्रतिकारं करोति यथा- सन्धि-विग्रह-यान-आसन-द्वैधीभाव-आश्रयश्च एतानां गुणानां यथोचित उपयोगं करणीयं, समुद्यतगुणेभ्य: सम्पन्नं भवित्वा परुषस्य सम्पूर्णं आयु प्राप्तवान्।[7] आचार्यकौटिल्योऽपि षडगुणानां वर्णनं कृतवान्।[8] कौटिल्यस्य मते गुण: षड् सन्ति परञ्च सन्धि-विग्रह त्यक्त्वा चत्वार: गुणा: सर्वथा भिन्ना: सन्ति।[9] मन्त्रीवसुरक्षित: अनन्तवर्माया: उपदेशं ददाति यत् शास्त्रमार्गस्य अलोके नियतमार्गे जीवन: सुखमय: चलति। मन्त्र्या: चर्चा आचार्यकौटिल्योऽपि कथयति।[10] अनन्तवर्माया: एक: सेवक: विहारभद्र: असीत् य: कथयति यत् निश्चितरुपेण राजविद्या चत्वार: सन्ति। यथा- त्रयी-वार्ता- आन्वीक्षिकी-दण्डनीति। चन्द्रगुप्तमौर्यार्थं आचार्यचाणक्य: षटसहस्त्रश्लोकानां संक्षिप्तरुपेण अवदत्। य: यथा कार्यं करोति तथा फलं प्राप्यते।[11] अत्र नृपस्य व्यसननां ग्रहणं करोति। मनुस्मृत्यां व्यसननां परिचयं मिलति। यथा- नृपस्य कामजन्य: दश: क्रोधजन्यश्च अष्ट: अस्ति। व्यसननां प्रयत्नपूर्वकं त्यागं करणीयम्।[12] अपि च विहारभद्रस्य नकारात्मकं विवेचनं तस्य सकारात्मकरुपेण परिदृश्यते। एकं नृपं इथ्यं धूर्त:,दृष्ट: पुरुषेभ्य: रक्षणीयम् तस्य परामर्शेण मन: कदापि विचलितं न करणीयम्। दशकुमारचरिते नृपस्य जीवनं किञ्चित् प्रहारणां विभक्तं कृतवान्। यस्य विवेचनं प्राचीनशास्त्रणामपि प्राप्यते यत् राजकार्यं सुव्यवस्थितरुपेण संचालनं करणार्थं नृप: दिवानक्तं अष्टघटिकायां विभक्तं कृतवान्। अथवा पुरुषस्य छायाचित्रतोऽपि स: काले विभाजनं कर्तुं शक्नोति। सूर्योदयात् नीत्वा यावत् पुरुषस्य चित्रछाया त्रिगुणं दीर्घं भवति, दिवसस्य अष्टधा भवति। एषा त्रिपौरुषीछाया कथयति।[13] विश्रुतचरितस्य अन्ते अश्मकेन्द्र विदर्भराज्यं नयनार्थं अनेक नीतीनां प्रयोगं करोति। यथा- शत्रुसेनायां छद्मवेशे आगच्छति, लोभदृष्ट्वा सेनान् हत:।

---

[1] महाभारत, स्वर्गारोहण पर्व ५/६३

[2] आदिशं च तम्- सखे, सैषा सज्जनाचरिता सरणि, यदणीयसि कारणेऽनणीयानादर: संदृश्यते। दशकुमारचरित.

[3] कौटिल्य, अर्थशास्त्रम्,१/१०.

[4] U.N. Ghosal. A history of Indian political idea (chapter xx, page-352)

[5] दशकुमारचरित, अष्टम उच्छवास।

[6] अनर्थ्याश्च प्रिया दृष्टाश्चित्तज्ञानानुर्वातन:। अभिहास्येष्वभिहसेद घोरहांसांश्च वर्जयेत्।। अर्थशास्त्रम् पृ. ४२७.

[7] दशकुमारचरित, पृष्ठ सं.२९(विश्रुतचरित)

[8] मनुस्मृति- ७, पृष्ठ सं. १६०.

[9] सन्धिविग्रहासनयानद्वैधीभावा: षडगुण्यमित्याचार्या। षाड्गुण्यमेवैतदवस्थाभेदादिति कौटिल्य:।। कौटिलीय-अर्थशास्त्रम्।

[10] जानपदोऽभिजात: स्ववग्रह: कृतशिल्प……..संप्रियो वैराणामकर्तेत्यमात्यसंपत् ।अर्थशास्त्रम्, १-८.

[11] तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च ता: तावदासताम्। अधीष्व तावद्दण्दनीतिम्।...षड्भि: श्लोकसहस्रै संक्षिप्ता। विश्रुतचरितम् पृष्ठ. – ४५, अर्थशास्त्रम्- १/१/३.

[12] दशकामसमुत्थानि तथाअष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेत विवर्जयेत् ।। मनुस्मृति,७/४५.

[13] नाडिकाभिरहरषृधा रात्रिं च विभजेत्, छायाप्रमाणेन वा। अर्थशास्त्रम्,पृष्ठ स.– ६१.

अनन्तवर्मानृपस्य उपरि मिथ्यारोपं प्रसारयति इत्यादि। यस्य विचार: अर्थशास्त्रे स्पष्टरुपेण प्रकटयति। यथा- शत्रो: सेनाशिविरे एक: बहुमुखी सुरंग: निर्माणं कृत्वा शत्रो: मुख्यजनानां तस्मिन् अवरुध्यनीयम् अथवा समयानुसारं अरिनृपस्य तस्मिन् विघ्ने अवरुध्यनीयम्।[14]

**उपसंहार:**

इथ्यं रामायणे, महाभारते, मनुस्मृत्याम्,अर्थशास्त्रे ग्रन्ते एकस्य राज्यार्थं सप्तांगा: सन्ति। यथा- कायायां हस्थ:, पाद: अति महत्वपर्णं अस्ति तथैव एतत् सप्तअङ्ग अस्ति। यथा- आत्मा-अमात्य-कोष-दण्ड-मित्र-जनपद-पुर। एकस्य राज्यस्य निर्माणे एष: सप्तांग: अत्यन्तोपयोगी अस्ति।[15] य: दण्डीविरचित: दशकुमारचरितस्य सप्तम्-अष्टमोच्छवासयो: सम्यकरुपेण लभते। सप्तानां अङ्गेन युक्त: नृपपुण्यवर्माया: राज्य: सम्यकरुपेण प्रचलति स्म:। परञ्च तस्य पुत्र: अनन्तवर्मा राजनैतिकनियमानां सम्यकरुपेण न पालनं करोति स्म: । एतस्मात् कारणात् तस्य राज्यस्य विनाशं अभवत्।

अत: उपर्युक्तात् लेखात् एष: विचार: प्रकटयति यत् वर्तमानकाले राज्यस्य अथवा राष्ट्रस्य य: प्रधानमन्त्री भवति। तस्य अपि प्राचीनकौटिल्यादि राजनैतिकसिद्धान्तानां पालनं करणीयम्। तदा अस्माकम् देशस्य सामाजिक:, आर्थिक:, राजनैतिकश्च शक्ति: वर्धिष्यति। देशस्य अग्रेऽपि उन्नति: भविष्यति। सर्वे जना: सुखमय: शान्तिप्रियरुपेण जीवनं निर्वाहणं करिष्यन्ति।

**सन्दर्भग्रन्थसूची -**


1. चतुर्वेदी, शशिशेखर(व्या.). *विश्रुतचरितम्*, वाराणसी: चौखम्बा सुरभारती प्रकाशन, प्रथम संस्करण 2016.
2. गैरोला, वाचस्पति. कौटिलीय-अर्थशास्त्रम्, वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2015.
3. शास्त्री, गजानन. मनुस्मृति, चौखम्बा सुरभारती प्रकाशन, 2014.
4. ऋषि,उमाशंकर,सस्कृत साहित्य का इतिहास, वाराणसी: चौखाम्बा भारती अकादमी, 2010.
5. बालकृष्ण, नारायण. दशकुमारचरितम्, दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, 2013.


[14] सुरुङ्गाममित्रस्थाने बहुमुखीं कृत्वा विषयमुख्यानभिहारयेद् अमित्रं वां। अर्थशास्त्रम्- पृष्ठ सं-६९७.

[15] स्वाम्यमात्य सुहृत्कोष राष्ट्र दुर्ग बलानि च संरतांगमुच्यते। शुक्रनीति,१/६१.

- स्वाम्यमात्यौ पुरं राष्ट्र कोष दण्डो सुहृतस्तथा। मनुस्मृति,१/६१.
- स्वाम्यामात्यजनपद दुर्ग कोश दण्डमित्राणि प्रकृतय:। अर्थशास्त्रम्,६/१/१.